॥ ६० ॥ प्रणम्य शिरसा शंभुं स्वल्पैर्व्यापिगिरा हरेः । लक्षणं प्राकृतं वक्ष्ये किंचिद्वृद्धमतादहं ॥ १ क्वचिल्लोपः क्व
चित्संधिः क्वचित्संधिविपर्ययः । आगमोंतादिमध्येषु लक्ष्यः स्यात्सुलापितात् ॥ २ सिद्धं प्राकृतं त्रिधा । सिद्धं प्रसि
द्धं प्राकृतं त्रिधा त्रिप्रकारं ॥ संस्कृतयोनि । तत्रेदं । यज्ञः । जण्णो । मात्रा । मत्ता । नित्यं । निच्चं ॥ १ समसंस्कृतं । तत्रेदं । सूरो ।
सोमो । जाल । कंदल । कोमल । इत्यादि । २ देशीप्रसिद्धं । तत्रेदं । लूसियं । छुट्टं । चंडिक्को । पहुली इत्यादि ॥ ३ ॥ १ लिंगं च प्रा
कृतलिंगमपि त्रिधा त्रिप्रकारं भवति । देवो । गंगा । कुलं ॥ २ तस्मात्संस्कृतवद्विभक्तयः । तस्माल्लिंगात्पराः सं
स्कृतवद्विभक्तयो भवंति । देवो । अग्गी । रिवू । बुद्धी । धेणू । नई । वहू । पढं । दही । महू । तुमू । अहमू ॥ जसू । देवा । कुलानि
। यूयं वयं तुम्हे । अम्हे ॥ अमू । देवं । अग्गिं । तरुं । गंगं । बुद्धिं । धेणुं । पढं । दहिं । महुं । तं । मं । त रक्खउ । म रक्खउ
॥ शस । गंगा । तुम्हे रक्खउ । तुज्झे रक्खउ । वो । अम्हे ॥ रक्खउ । रक्खउ नो । टा । देवेण । तरुणा । महुणा । दहिणा । भिस्
। अग्गीहिं । बुद्धीहिं । रिवूहिं । नईहिं । महूहिं । दहीहिं । तुम्हेहिं । अम्हेहिं ॥ ङसि । देवा । तस्याः तीस्सा । ताह । ङस् । तु
ज्झो । तुज्झो । मा । तव सुहं । मम सुहं ॥ आम् । देवाणं । नईणं । बुद्धीणं । धेणूणं । तेसिं । तासिं ॥ ङि । गामे । कुले । तत्रात
स्मिन् तम्मि । त्वयि तम्हि । त्वयि । मयि । तइ मइ ॥ सुप् । देवेसु । अग्गीसु । नईसु । बुद्धीसु । मालासु । कुलेसु । तुम्हे

१

सु । अम्हेसु । एवमादि द्रष्टव्यं ॥ ३ क्वचिद्व्यत्ययः । एषां लिंगानां क्वचिद्व्यत्ययो भवति । एसो । जसो विक्कुणो । देवा रक्खउ
॥ ४ सामआमस्यामो णो ह्वा वा । सामआमस्यामोऽनागमस्य णकारो भवति । हं वा । ताणं । ताहं । देवाणं । देवाहं । क
म्माणं । कम्माहं । सरियाणं । सरियाहं । तुम्हाणं । तुम्हाहं । अम्हाणं । अम्हाहं ॥ ५ संख्याया ण्हः । संख्यायाः परस्य साग
मस्यानागमस्यापि आमो ण्हं भवति । पंचण्हं । तीसण्हं ॥ ६ हिंर्भिसः । लिंगात्परस्य भिसो हिंर्भवति । देवेहिं । गामेहिं
॥ ७ हिंतो भ्यसः । लिंगात्परस्य भ्यसो हिंतो भवति । गामाहिंतो । सद्धाहिंतो । धेणूहिंतो । बुद्धीहिंतो । नईहिंतो । तु
म्हेहिंतो । अम्हेहिंतो ॥ ८ तृतीयादीनामत्व मकाव स्त्रियां । तृतीयादीनां टाङसिङसङिवचनानां एत् भवति स्त्रियां
। गंगाए । बुद्धीए । नईए । वहूए । तीए । ताए ॥ ९ उ ओ लोपौ जस्शसोः स्त्रियां वर्तमानयोर्जस्शसोः उत् भवति । ओ भ
वति । लोपो भवति । मालाउ । मालाओ । माला । बुद्धीउ । बुद्धीओ । बुद्धी । धेणूउ । धेणूओ । धेणू । नईउ । नईओ । नई । एवं श
सोपि ॥ १० उं सि पूर्वदीर्घं । उंसि उल्लिंगवर्तमानयोर्जस्शसोः पूर्वस्वरो भवति । अग्गी । तरू ॥ ११ णो ङसेश्च । उल्लिं
गवर्तमानयोर्जस्शसोः सो से भवति । पंचम्येकवचनस्य । अग्गिणो जलंति । मुणिणो पस्स । गिरिणो एइ नई
१२ स्स श्च ङसः । उंसिवर्तमानस्य ङसो णो भवति । स्स च भवति । मुणिणो रूवं । अग्गिस्स सिहा ॥ १३ एम्मी ङेः ।

पुंसि ङि वचनस्य एन्नवति। म्मिश्च भवति। अग्गीए। अग्गिम्मि। गामे। गामम्मि॥१४ एत्ता सोऽतः। अतोऽकारादुत्तरस्य ङसः
षष्ठ्येकवचनस्य लिंगे एन्नवति। देवेव। त्तणे॥१५ उ उ हिं हिंता लो पाञ्चस्यातः। पंचमी आत आदेशतकारस्य उ उ हिं हिंता लो पाए
ज आदेशा भवंति। गयणाउ। गयणाउ। गयणाहिं। गयणाहिंतो। गयणा॥१६ त दिदमोः स्स षष्ठीरूपाणां। तदइ
दमोऽमयो रकवद्विवक्षत्वेऽपि स्त्रीलिंगनपुंसकेषु यद्रूपं तस्य स्स भवति। तस्या रूपं स्सरूवं। तस्या गुणाः। स्सगुणा।
एवं शेषेष्वपि द्रष्टव्यं॥१७॥ युष्मदः। अत ऊर्द्ध्वं युष्मदध्यायो भवति॥१८ तुमं त्मोः सविभक्तेः। युष्मच्छब्दस्य सविभक्ते
ः स्मो परतः तुमं आदेशो भवति। तुमं देवो॥१९ अमि तु ए च। युष्मदोऽमि परे तुमं भवति। तु ए च सविभक्तेः तुमं भ
णामि। तु ए भणामि॥२० तुज्झे जसि। युष्मादो जसि परे तुज्झे भवति। सविभक्तेः। तुज्झे मणुस्सा सुरा॥२१ तुज्झे शसि।
युष्मच्छब्दात् शसि परे तुज्झे भवंति। सविभक्तेः। तुज्झे मणुस्सा भणामि॥२२ तउ मे त इ त ए टायां। युष्मदष्टावचने पर
तउ मे त इ त ए एते आदेशा भवंति। सविभक्तेः। किं तकयं तउ मे दिट्ठं। तइ मज्झं कयं। तए पलत्तं॥२३ तुमाहिं तुमादिं
ता तुमाउ तइंतो पंचम्यां। युष्मदः पंचम्येकवचने परे तुमाहिं तुमाहितो तुमाउ तइंतो एते आदेशा भवंति। स
विभक्तेः। तुमाहिं अहं सूरो। तुमादिंतो अहं सुहउ। तुमाउ अहं नाणी। तइंतो निरक्कतो॥२४ तउ ह उज्झ उम्ह षष्ठ्यां

युष्मदः षष्ठ्येकवचने परे तउ ह उज्झ उम्ह एते आदेशा भवंति। सविभक्तेः। तउ हसीलं। तुज्झ कला उ। तुम्ह गुणा॥२५
अस्मदः। अत ऊर्द्ध्वं अस्मदध्यायो भवति॥२६ मे मम ए टायां। अस्मदष्टावचने परे मम ए भवतः। मे कयं। मए दिट्ठं
॥२७ मइंतो ङसो। अस्मदः पंचम्येकवचने परे मइंतो भवति सविभक्तेः। मइंतो॥२८ अम्हाहिंतो [illegible]मि अम्हाहिं
तो [illegible] सुकरो॥२९ मह मम ङसि। अस्मदः षष्ठ्येकवचने परे मह मम भवतः। सविभक्तेः। मह सीलं मम गुणा
॥३० अम्ह सामि। अस्मद आमि परे अम्ह भवति। सविभक्तेः। अम्ह चियतदोसा॥३१ इति चंडकृते प्राकृतलक्षणे
विभक्तिविधानं प्रथमं समाप्तं॥१ ॥ अथ स्वरविधानमाह। स्वराणां स्वरप्रकृति लोप संधयः। स्वराणां स्वरप
रस्पः प्रकृति लोपः संधयश्च भवंति। इह अच्छइ सहइ च दिट्ठं। इहागउ। इह छइ। आदविंदवं दिट्ठं। सक्कीसाणा। सईस
रो नीसो। गहेसो। चंडकूला। नवो वरो हो। सोऊण। नीसासूसा सा। मो रा। गामा गामो। गामो। गामा ठा। गामो मा
मा। बुद्धी। इमा। बुद्धिंदा। बुद्धीसो एवं बुद्धी। बुद्धी ठा। नई उ॥१ संयोगपरलोपः संयोगपरस्वरपरतः पूर्वस्वर
स्य नित्यं लोपो भवति। धनाढ्यः। धणड्ढो। देवेंद्रः। देविंदो। कृतउद्योतः। कउज्जोउ॥२ ह्रस्वत्वं संयोगे स्वराणां
ह्रस्वत्वं भवति संयोगात्परा। कह्वा। कज्जं। कडक्खियं तिरक्कं। सिग्घा। उद्दी। सुज्जो॥३ स्वरात्याऽन्त्यस्या स्व

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ता।३ नोऽनस्य स्थाने नवति। कायव्वं। सुइणं। इंगाली। तीसा। वुत्तं। वम्मि। वुड्डीए। धणूए। नउरं। संगिह्नइ। कट्टु। नइए
वं। कुसुद्दं। निर्वार्यते। निव्वारियइ। कुत्रापि गच्छइ॥४ स्वरा रिच ऋवर्णस्य। ऋवर्णस्य स्थाने स्वरा नवंति। रिच नवति।
घृतं। घयं। कृत्वा। काऊण। दृश्यते। दीसइ। ऋषि। इसि। पृथ्वी। पुहवी। वुड्ढो। वृंतं। विंटं। उत्कृष्टं। उक्कोसं। ऋणं। रिणं
॥५ एरेतः। एतः स्थाने ए नवति। वेयड्ढो। तेल्लं। सेंधवं। वरं॥६ अइ इचा ऐतः स्थाने अइ इत्ययमादेशो नवति। ऐश्व
र्यं। अइसरियं। वेरं। वइरं॥७ उ रोतः। अतः स्थाने उ नवति। उसहो। सो अ बलो॥८ अउ चौ अतः स्थाने अउ च नवति।
सउहो। कउरवा। कउला॥९ एप्रदाद्वा लोपो विसर्जनीयस्य। एत् उत् र लोपो विसर्जनीयस्य स्थाने नवंति। कयर
गच्छइ। दिनकरो। द्रवो। वंनणो। पुणर वि। एयं दिठ्ठं सो। एस। वृद्धवृद्धा। वुड्ढी॥१० अदागमोऽनुस्वारलोपो च व्यंज
नस्य। अकारागमोऽनुस्वारलोपो च व्यंजनस्य नवति। अरहंता। आरिआणं। कम्मं। रम्मं। सीसं। नहं॥ सरेण। सि
रीणा॥११ द्विवंबहुत्वेन। द्विवचनं बहुवचनेन वाच्यं। हत्था। पाया। देवा। वंनणा॥१२ षष्ठी चतुर्थ्यी। षष्ठी चतु
र्थी [illegible]। नमो नारायणस्स। नमो गुरूणो॥१३ नद्युतडः आः प्लुतावर्णो उकार नकारौ च नवंति॥१४ अनुस्वा
रो वक्तव्यः। अनुस्वारस्य क्वचिल्लोपो नवति। क्वचिदागमः। क्वचिन्न नवति। वंनणा। मंजरो। विंचुओ। चुंनो। काऊ

२

णं। काउं। नहिं। सक्कयं। संगो। सग्गो। वुड्ढं। समिद्धं॥१५ गोर्गाविगो। गोशब्दस्य गावीत्ययं निपात्यते। गावि। गावीउ। गावी
हिं। गावीणं। गावीसुं॥१६ एवार्थे ण इत्त च चिय। एवशब्दार्थे ण इत्त च चिय एते आदेशा नवंति। गत्या एव। गइ
णइ। मइणइ। तेत्त चय। सच्चिय॥१७ अपिअसिअनयोरलोपः। अपि अस्ति अनयोः अलो नवति। सूरो वि। कयंपि। तं सिइ हा॥१८
तुत्ता। आ डुंतु तूणउं प्पि पूर्वकालार्थे। तुत्ता। आ डुंतु तूणउं प्पि पूर्वकालार्थे नवंति। वंदित्तु। वंदित्ता। सुड्ढा। कट्टु।
नेत्तुं। नेतूणं। वंदिउं। एउ कप्पि॥१९ मत्वर्थे आल इल्ल मत्वर्थे आल इल्ल एते प्रत्यया नवतः। जडिल्लो। जडालो।
फडिल्लो। फडालो॥२० तावतावतः। तावच्छब्दस्य ताव नवतः। ता विछिन्नं गयणं। ताव च्चिय जलहिणो यगं
नीरा। ता गुरुआ सुरसेला धीरहिं नजा वलिज्जंति॥२१ उपमाने पिव इव विव वियँ व जहा वतः। उपमाने ऽर्थे
पिव इव विव विय व जहा वतः। आह्नस्य एते आदेशा नवंति। वंदणं पिव। चमरमिव। कमलं विव उजसुहं। मि
[illegible]मा। सो यसु [illegible] सेस [illegible] एस फणी। उहलाइ जसो। जहा संखो॥२२ उव्वमवा पयोः अव अप योः स्थाने उ न
वति। अवहा [illegible] हसिओ। अपसरितं उसरियं। अपवरकः उवरओ॥२३ खलुः खुः। खलुशब्दस्य खु आदे
शो नवति। [illegible] उपीलए॥२४ अतावर्तमानार्थे। यो वर्तमानकार्थे आनप्रत्ययस्तस्यार्थे तकारो नवति।

४ञ७

चइअमानं। तिइज्जंतं। कथ्यमानं। कहिज्जंतं। साध्यमानं। साहिप्पंतं। साहिज्जंतं॥२५ भे सर्वास्तु युष्मदः। युष्मच्छब्द
स्य सर्वास्वपि विभक्तिषु भे भवति। भे निसामेह। यूयं शृणुत। भे भणामि। युष्मान् भणामि। भे कयं। त्वया कृतं॥२६
अस्मदोपि। अस्मच्छब्दस्यापि सर्वासु विभक्तिषु णे भवति। णहेण भणामो। भे तुह्मा। वयं युष्मान् भणाम इत्यर्थः
॥२७ इतरियः। इतिशब्दस्य इयादेशो भवति इय एवं॥२८ भावे त्तण। भावार्थे त्तणप्रत्ययो भवति। गामत्तणं।
णयरत्तणं॥२९ इति षडझात स्वरविधानं द्वितीयं समाप्तं॥ ॥१ अथ व्यंजनविधानमाह॥ हाद्यवौ लोप्यौ।
हात् हकारात् यकार वकारौ परस्थौ वर्त्तितौ लोप्यौ भवतः। मह्यते मुज्झए। दह्यते दज्झए। विह्वलो विझलो।
जिह्वा जिझा॥२ आसवलान्यो व्यंजनं। आसवलेभ्यो अन्यो व्यंजनं लोप्यं भवति। श्रोतव्यं। सोयव्वं। काव्यं कव्वं। स्वयं स
यं। स्वर्गं सग्गं। शल्यं सल्लं। बिल्वं बिल्लं। शस्यं सस्सं। कृतं त्तुअं। स्नेष्मा। सिम्हो॥३ वर्गे वर्गेपि रयतूर्ध्वं व्यं
जनं तल्लोप्यं भवति। शक्रः सक्को। रक्तं रत्तं। मुग्धं मुद्धं। दुग्धं दुद्धं। वच्छि। वमि। षड्क। वक्कं। षट्पदः। छप्पओ। षण्मु
खः। छम्मुहो। षड्ड। खग्गं। आत्मा अप्पा। उत्पलं उप्पलं। सद्भावः सब्भावो। मन्मथो। वम्महो। माशं। पत्रं। वघन्नं। प
त्तुन्नो। अर्कः। अक्को। उल्का। उक्का। भास्करो। भक्करो। कः करोति। को करइ। कः पचति। को पयइ। आवलावणो।

४

॥३ समो वर्गाद्यं। वर्गाद्यं व्यंजनं सो परं लोप्यं भवति। वक्षः। वच्छो। क्षमा। खमा। संवत्सरः। संवच्छरो। मत्सरः। मच्छरो।
अप्सराः। अच्छरा। इंगितं। इंगियं॥४ वर्गादवर्ग्यं। वर्गात्परं अवर्ग्यं व्यंजनं लोप्यं भवति। सौख्यं। सुक्खं। शंकः। संको।
क्लीबः। कीवो। विध्वंसितं। विद्धंसियं। ऊर्ध्वं। उद्धं। पात्रं पत्तं॥५ समाद्व पंचमो वा। वर्गपरः सपरश्च वर्गपंचमो वा लोप्यो
भवति। ज्ञानं। नाणं। यत्नं। जत्तं। लक्ष्मणो। लक्खणो। लक्ष्मीः। लच्छी। तीक्ष्णं। तिक्खं। वृत्तिं। वच्छि। विज्ञानं। णाणं। आ
त्मा। अप्पा। तीक्ष्णं। तिक्खं। अम्रं। पक्कं॥६ द्वो वा। दकारो वकारपरो लोप्यो भवति। द्वारं। वारं। भवति किं दारं॥७ षाद्धः। ष
कारात्परः ष्टकारो वा लोप्यो भवति। वक्षः। षष्ठः। कोसो। स्पृष्टः। फुडो। स्पृष्टं। पुट्ठं। उत्कृष्टं। उक्किट्ठं। नष्टं। नट्ठं। दृष्टो। दिट्ठो।
॥८ रफः सर्वत्र। सर्वस्मात् व्यंजनात्परः सर्वत्र रेफो लोप्यो भवति। नक्रः। नक्को। अर्कः। अक्को। सुरवः। सुरवो। व्य
ग्रोधः। निग्गोहो। मार्गः। मग्गो। शीघ्रः। सिग्घो। अर्घः। अग्घो। अर्चनं। अच्चणं। वर्ज्यं। वज्जं। दुर्जनः। दुज्जणो। उद्गूढः।
वूढो। दंष्ट्रा। दाढा। सुवर्णस्तु मन्नेकर्तव्यं। कायव्वं। रश्मिः। रस्सी। कर्दमं। कद्दमं। उर्ध्वं। उद्धं। प्रवरः। पवरो। सर्पः।
सप्पो। विभ्रमः। विब्भमो। वर्चः। वच्चो। आम्रं। अंबं। धर्मो। धम्मो। सूर्यः। सुज्जो। वर्तव्यं। पर्वतः। पव्वओ। कृतं सुयं।
हस्वः। हस्सो॥९ असंयोगस्य। अतः व्यंजनादसंयोगस्य असंयोगस्य भवति। घटं घरं। स्नेनः। खंभो।

॥१०प्रथमद्वितीययोर्द्वितीयचतुर्थौ। वर्गाणां प्रथमद्वितीययोः स्थाने यथासंख्यं द्वितीयचतुर्थौ भवतः। भास्करः।
भक्खरो। निश्चयः। निच्छओ। डष्टं। डुट्ठं। स्तनो थणो। परुषं फरुसं। मुखं मुहं। खिद्यते खिज्जइ। दंष्ट्रा दाढा। मथुरा महुरा। स
नाथो नाहो॥११प्रथमस्य तृतीयः। प्रथमस्य स्थाने तृतीयो भवति। एकं एगं। तीर्थकरः। तित्थयरो। पिशाचो पिसाजो।
जटाउडा। कृतं कदं। प्रतिषिद्धं। पडिसिद्धं। वृद्धो वुड्ढं॥१२हः खघधभानां। खकारघकारधकारभकाराणां इत्येषां
स्थाने हकारो भवति। मुखं मुहं। मेघो मेहो। माधवो माहवो। वृषभो वसहो॥१३सस्य खछहाः। सकारस्य स्थाने ख
छहा भवंति। निक्का। निरका। षण्मुखः छम्मुहो। पाषाणः पाहाणो। दश दह॥१४यस्य जः। यकारस्य स्थाने जकारो
भवति। यौवनं जुवणं। सूर्यः सुज्जो। यात्रा जत्ता॥१५तवर्गस्य चटवर्गौ। तवर्गस्य स्थाने चटवर्गौ भवतः। यथासं
ख्यं। नित्यं निच्चं। पथ्यं पच्छं। विद्या विज्जा। वंध्या वंझा। नृत्यं नट्टं। स्थितः ठिओ। दंडा। दग्धो दड्ढो। धन्यं धण्णं॥१६युष्मदा
यस्य कः। युष्मसंबंधिनो यकारस्य तकारो भवति। तुम्हेहिं॥१७रशषाणां सः। रेफशकारषकाराणां स्थाने सकारो
भवति। शिरः सीसं। शशी ससी। आमिषं आमिसं॥१८हजघानां रभखाः। हजघानां स्थाने रभखा भवंति। गृहं घरं।
झीनं नालं। स्तंभो खंभो॥१९गरहाणां घणसाः। गरहाणां स्थाने घणसा भवंति। यथासंख्यं। गृहं घरं। करवीरः क ५

णवीरो। ब्राह्मो बम्हो॥२०मडहानां वलभाः। मडहानां स्थाने यथाक्रमं वलभा भवंति। मन्मथो वम्महो। षोडशा सो
लस। जिह्वा जिब्भा॥२१पवयोर्वित्यासः। पवयोर्व्यत्यासो भवति। पर्यंकः पेल्लंको। वैडूर्यः वेरुलिअं। त्रयोदश तेर
हो। हस्का रुक्का मे॥२३सहयोर्लोप्य नणमानामधो वा। अपदादावस्थानानां। नणमो नां संबंधिनोर्योः सकारह
कारौ तयोर्लोपे हकारागमो भवति। अपदादावस्थानानां। प्रश्नः पण्हो। तृष्णा तण्हा। यस्मात् जम्हा। कृष्ण
कण्हो। ग्रीष्मो गिम्हो। उष्मा उम्हा। गृह्णाति गिण्हइ। डिंभो डिम्हो। निह्नवितं निह्नविअं। निह्नवका निह्नवया। वह्निः व
ह्नी। अपदादाविति किं। श्मशानं मसाणं॥२४लोपे द्वित्वं। संयोगाक्षरस्य लोपेऽवशेषस्य द्वित्वं भवति। दुर्गं दुग्गं। श
क्रः सक्को। तस्कराः तक्करा। व्याघ्रः वग्घो॥२५क्वचिदलोपेपि। क्वचिदलोपेपि द्वित्वं भवति। न ज्ञायते न नज्जइ।
बाध्यते बहिज्जइ॥२६तस्मिन् द्वितीयचतुर्थयोः प्रथमतृतीयौ। तस्मिन् द्वित्वे वर्तमानयोर्द्वितीयचतुर्थयोः सं
योगाद्यौ प्रथमतृतीयौ भवतः। सौख्यं सुक्खं। अर्घः अग्घो। पथ्यं पच्छं। साध्यः सज्झो। षष्ठः छट्ठो। वृद्धो वुड्ढो। पा
र्धः पद्धो। वर्द्धमानः वड्ढमाणो। पुष्पं पुप्फं। जिह्वा जिब्भा॥२७सपवाऽन्येषां। अन्येषां उक्का वा शषाणां द्वित्वं सप
वा भवति। अर्कः अक्को। स्वर्गः सग्गो। संतप्त सबा। उज्जीना उड्डूणो। नाम्नं नहं। त्रुक्कं तुक्कं। धान्यं धन्नं। सर्पः सप्पो। उल्का

सुझं।काव्यं कव्वं।हास्यं हस्सं॥१९ न पदादौ।पदादौ द्वित्वं न भवति।क्रुद्धः कुद्धो।क्षुद्रः खुद्दो।पदादाविति किं।नद्धः।न[illegible]
ए क्वचिदन्यत्रापि।क्वचिदित्यदमाध्य ऽवसाने च लोपेऽपि कृते द्वित्वं न भवति।काश्यपः।कासवो।विश्रवणः।[illegible]सवणो।
स्पृष्टं छिडं।कर्तव्यं।कायव्वं।शीर्षः।सीसो।दीर्घः।दीहो।उत्कृष्टं उक्कोसं॥२० संयोगस्य हस्वरागमो मध्ये।हयोर्वं
जेनयोर्मध्ये इत्स्वरागमो भवति।अग्निः।अगणी।विश्लेषः।विसलेसो।वर्षं वरिसं।सूर्यः।सुरिउ।प्लक्षः।पलक्खो।
सर्षपः।सरिसिवो।वज्रं वइरं।वैडूर्यः।वेरुलिअं।कृत्स्नं।कसिणं।श्लाघा।सलाहा।सूक्ष्मं सुहमं।रश्मिः रस्सी।पद्मं प-
उमं॥२१ उ तु वा यारिङ्गातौ।यकारवकारयोः स्थाने इङ्गातौ भवतः।भवति।होइ।त्रयोदश।तेरह॥२२ संख्यायास्त्रि-
शयोर्लोपः।संख्यायां संबंधिति शयोर्लोपो भवति।विंशतिः वीसा।पंचाशत् पन्नासा॥२३ तस्य च।संख्यासंबधि-
न तस्य लोपो भवति।पंचपंचाशत्।पणपन्ना॥२४ कवर्गतृतीयायाः स्वर ककारस्य वर्गतृतीयस्य च स्वरपर-
लोपो भवति।कोकिला।कोइला।काकी।काई।सकुनः।सउणो।भवति।प्रतिकूलः।पडिऊलो।कनकं।कणयं।काकः।का-
उ।लौकिकः।लोइउ।त्यागिनः।चाइणो।प्रगुणं।पउणं।अवगूढः।अवऊढो।त्यागेन।चाएण।त्यागः।चाउ।सुखि-
सुइरं सुचिः सुइ।सबलेन।सउलेन।पिशाचेन।पिसाएण।पिशाचः।पिसाउ।वनराजिफलं।वणराइफलं।व-

नराजी।वणराई।गायनः।गाइणो।गजः।गउ।प्रकृष्टं।पद्माहसियं।पतिना।पइणा।गोमती।गोमई।जतुना।ज-
उणा।चातुलो।वाउलो।वातेन।वाएण।वातः।वाउ।मदिरा।मइरा।नदी।नई।पादुका।पाउआ।मदनः।मयणो।मदो।
मउ।कूपिका।कूइया।कपीनां।कईणं।नूपुरं।णेउरं।रिपूनां।रिऊणं।रूपेन।रूएण।धूपः।धूउ।कविना।कइ-
णा।कवीनां।कईणं।कापुरुषः।काउरिसो।[illegible]रएण।देवः।देउ।मयि।मइ।मायी।माई।प्रयुक्तो।पउत्तो।मयूरः
मऊरो।विप्रयोगः।विप्पओगो॥२५ अपयत्नमवर्णे ककारवर्गतृतीययोः स्वरे परे यत्वं भवति।काकाः।काया।
नागाः।नाया।पिशाचाः।पिसाया।यदा।जया।अपकृतं।अवहडं।अवहयं।पिता।पिया।माता।माया।रवा।रया।
अवर्ण इति किं।देवा।देआ॥२६ शिष्टप्रयोगाद्व्यवस्था।व्यवस्थावमविस्थानं शिष्टप्रयोगाज्ज्ञातव्यं।अर्कः।अक्को
।सूर्यः।सूरि।उन्नि।[illegible]।निरका।लक्ष्मीः।लच्छी॥२७ इति वडकृतौ व्यंजनविधानं तृतीयं समाप्तं॥ न लोपोऽपभ्रंशे-
ऽधोरेफस्य।अपभ्रंशेऽधोरेफस्य लोपो न भवति।वक्रुयाउ।वाघ्र।घ्रस्सिजादि॥१ पैशाच्यां विकारे रणयोर्लनौ।
।पैशाच्यां विकारे रेफस्य लकारो भवति।णकारस्य नकारः।आलअल्लु।हलरकसा।पनमता।पनइहि।आसा।
२ मागधिकायां रसयोर्लशौ।मागधिकायां रेफसकारयोर्लशौ भवतः।वंदकलनिकलसवनि।शास

हं स्सपसुत्ते॥३ इति चं० कृ० प्रा० ल० नामांतरविधानं चतुर्थं समाप्तं॥ ॥सिद्धं प्राकृतं त्रिधा दसी प्रसिद्धं। लिंगं वा॥त
स्मा संस्कृतवद्विभक्तयः क्वचिद्व्यत्ययः। मागस्यामोणो हो वा। संख्याया एण्हः। हिं भिसः। हितो भ्यसः। तृतीयादीना
मेकत्वे स्त्रियां। उ उ लोपा जस्शसोः पुंसि पूर्वत्वं। णो ङसङ्योः। स्सङसः। एम्मि ङि ए शसोऽतः। उ उ हिं हिंतो लोपो स्त्रस्या
तः। तदिदमोः सषष्ठीरूपाणि। युष्मदः तुमं तो स विभक्तेः। अमि तु एव तुब्भे जसि तुब्भे शसि। ते तुमे तइ टायां
। तुमा हिं तुमाहिंतो तुमाउ तइं ता पंचम्यां। तुं ह तुम तुज्झ षष्ठ्यां। अस्मदः मे मए टायां। मइं ता ङसौ। मह मम ङः ॥
। मि अम्हं मा मि॥ इति विभक्तिविधानं॥ स्वराणां स्वरप्रकृतिर्लोपः संध्ययः। असंयोगपरलोपश्च संयोग।
स्वराऽत्याऽन्यस्य सरिच ऋवर्णस्य। ए रेतः। अइ वा। उ सितः। अन्त्यस्य पदे दुर्लोपो विसर्जनीयस्य। अदाग
मोऽनुस्वारस्य लोपो व्यंजनस्य। द्वित्वं बहुलं नाम्नि षष्ठी वा। चतुर्थी न सप्तङ्माः। अनुस्वारो बहुलं। गो गा वि एवा
र्थेण इव यचि वा। अस्य प्पस्योः रलोपः। हु सा वा। इउं तुं तूण उ पि पूर्वकालार्थे। मन्त्वर्थे आलइल्ल। ताता वता
वतः। उपमानि पिंव। इव विव वियव्व वजा वा वतः। उत्र म वाऽपार्थे। खलुः खु। तावत्र मानार्थे। लसवसु तु
ष्मदः अस्मदो पि इतरियः। पा वत्रण। इति स्वरविधानं द्वितीयं॥ हा ह वा। लोप्यो द्वा वले न्यो व्यंजनं। वर्गे। ७

सो वर्गाद्यं। वर्गादवर्गे। सा वा पंचमो वा। दा विषा हः। रफः पूर्वत्वस्य अस्य संयोगस्य प्रथमद्वितीययो द्विती
य चतुर्थौ। प्रथमस्य तृतीयः। हः खघथधभानां। सस्य षष्ठो वा यस्य जः। तवर्गस्य चटवर्गौ। युष्मदोयस्य तः। रथ
घाणां सः सजघानां रनखाः। गरहाणां घणसाः। मडहाणां वलनाः। पवयो व्यासः। सहजो लोपि नणमानां म
ध्ये होऽपदादवस्थामानां। लोपे द्वित्वं। क्वचिदालोपिपि तस्मिन् द्वितीयचतुर्थयोः प्रथमतृतीयो स एवान्येषां न
पदादौ क्वचिदन्यत्रापि संयोगस्य स्वरागमो मध्ये यवयोरिदुतौ। संख्याया स्त्रिशयोर्लोपः तस्य चा। कवर्गे तृ
तीययोः स्वरा यव मवर्से शिष्टप्रयोगाद्यवस्था॥ इति व्यंजनविधानं तृतीयं॥ न लोपो पचंद्रे शेऽप्रत्र रफस्य पै
शाचिक्यां रणयो र्लनो मागधिकायां ररायोर्लसौ॥ इति नामांतरविधानं चतुर्थं॥ प्राकृतव्याकरणं॥ ॥उत्तंत०

प्राकृतव्याकर्णं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२

Pothi No 54. Onz (1)

Dr. BHAU DAJI,
डाक्टरभाऊदाजीइत्यस्यस्मारकम्
MEMORIAL